## अध्याय :- १५ chapter-15

वरांग्युवाच ।।[१]

नाशितास्म्यपविद्धास्मि त्रासिता पीडितास्मि च ।।
रौद्रेण देवनाथेन नष्टनाथेव भूरिशः ।। १

दुःखपारमपश्यंती प्राणांस्त्यक्तुं व्यवस्थिता ।
पुत्रं[२] मे घोरदुःखस्य तारकं देहि चेत्कृपा ।। २

एवमुक्तस्तु दैत्येंद्रो दुःखितोऽचिंतदद्धृदि ।।
आसुरेष्वपि भावेषु स्पृहा यद्यपि नास्ति मे [३] ।। ३

तथापि मन्ये शास्त्रेभ्यस्त्वनुकंप्या प्रियते यत् ।
सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् ।। ४

व्यसनार्णवमत्येति जलयानैरिवार्णवम् ।
यामाश्रित्येंद्रियारातीन्दुर्जयानि तराश्रयैः ।। ५

गेहिनो हेलया [४]जिगूयुर्दस्यून्दुर्गपतिर्यथा ।
न कोऽपि प्रभवस्तां चाप्यनुकर्तुं गृहेश्वरीम् ।। ६

अथायुषा वा कात्स्न्येन धर्मं ह्रित्सुर्यथैव च ।
यस्यां भवति[५] चात्मैव ततो जाया निगद्यते ।। ७

---

१ ब. वरांगी उ च ।।
२ ब. पुत्रां
३ "च" अ. ब. पाठः ।
४ अ. जिगूम्
५ अ. "जायते" इति स्यात् ।

भर्तव्या एव यस्माच्च तस्माद्भार्येति सा स्मृता ।
सा एव गृहमुक्तं च गृहिणी सा ततः स्मृता ॥ ८

संसारकर्दमभ्रष्टा[1]श्रात्री कलत्रमिति सा ततः ।
एवं विद्यां प्रियां को वै नानुकंपितुमर्हति ॥ ९

त्रीणि ज्योतींषि पुरुषा इति वै देवलोऽब्रवीत् ।
भार्या कर्म च विद्या च संसाध्यंयत्नतस्त्रयम् ॥ १०

तदेनां पीडितां वैद्यः पतिर्भूत्वा न पालये[2] ।
ततो यास्ये शास्त्रवादान्नरकांतं न संशयः ॥ ११

अहमप्येनमिदं वै शक्तो जेतुं [3]यथाऽनुणाम् ।
पुनः कामं करिष्येऽस्था दास्ये पुत्रं महाबलम् ॥ १२

इतिसंचिंत्य वज्रांगः[4] कोपव्याकुल लोचनः ।
प्रतिकर्तुं महेंद्राय तपो भूयो व्यवस्यत ॥ १३

ज्ञात्वा तु तस्य संकल्पं ब्रह्मा क्रूरतरं पुनः ।
आजगाम त्वरायुक्तो यत्राऽसौ दितिनंदनः ॥ १४

---

१ अ. .....धात्री
२ अ. ब. "पालयेत" ॥
३ अ. तृणंयथा । ब. यथा तृणां ।
४ अ. वज्रांग ।

उवाचेनं स भगवान्ब्रह्मा[१] पुनर्मधुरया गिरा ॥ १५

ब्रह्मोवाच ॥[२]
किमर्थं भूम एव त्वं नियमंक्रूरमिच्छसि ।
आहारभिमुखो दैत्यतन्मे ब्रूहि महाव्रतैः[३] ॥ १६

यावदब्दसहस्त्रेण निराहारेण वै फलम् ।
त्यजता प्राप्तमाहारं लब्धं ते क्षणमात्रतः ॥ १७

त्यागो ह्यप्राप्तकामानां न तथा च गुरुः स्मृतः ।
यथा प्राप्तं परित्यज्य कामं कमललोचन[४] ॥
श्रुत्वैतद्ब्रह्मणो वाक्यं दैत्यः प्रांजलिरब्रवीत् ॥ १८

दैत्य उवाच ॥[५]
पत्न्यर्थे/हं करिष्यामि तपो घोरं पितामह ।
पुत्रार्थमुद्यतश्चाहं यः स्याद्गीर्वाणदर्पहा ॥ १९

एतच्छ्रुत्वा वचोदेवः पद्मगर्भोद्भवस्तदा ।
उवाच दैत्यराजानं प्रसन्नश्चतुराननः ॥ २०

ब्रह्मोवाच ॥[६]
अलं ते तपसा वत्स मा क्लेशैविस्तरैविश ।
पुत्रस्ते तारकोनाम भविष्यति महाबलः ॥ २१

---

१. अ. पुनर्मधु.....
२ ब. श्री ब्रह्मा उ० ॥
३ अ. व्रत
४ अ. नः
५ अ. ब. इत्ययं पाठः नास्ति ।
६ ब. श्री ब्रह्मा उ० ॥

इत्युक्तो दैत्यराजस्तु[1] प्रणम्य प्रपितामहम् ।। २२

विसृज्य गत्वा महिषीं नंदयामास तां मुदा ।
तौ दंपती कृतार्थौ च जग्मतुश्चाश्रमं तदा ।। २३

आहितं च ततो गर्भं वरांगी वरवर्णिनी ।
पूर्णं वर्षसहस्त्रं तु दधारोदर एव हि ।। २४

ततो वर्षसहस्त्रांते वरांगी समसूयत ।
जायमाने तु दैत्येंद्रे [2]तस्मिंल्लोक भयंकरे ।। २५

चचाल सकला पृथ्वी प्रोद्धूताश्च महार्णवाः ।
चेलुर्धराधराश्चापि ववुर्वाता विभीषणाः ।। २६

जेपुर्जप्यं मुनिचरा व्याधविद्धा मृगा इव ।
जहुः कांतिं च सूर्याद्या नीहाराच्छादयन्दिशः ।। २७

जाते महासुरे तस्मिन्सर्व एव महासुराः ।
आजग्मुर्हर्षितास्तत्र तथा चासुरयोषितः ।। २८

---

१ अ. दैत्यनाथः

२ अ. सर्वलोक

जगुर्हर्षसमाविष्टा ननृतुश्चा सुरांगनाः । *
ततो महोत्सवे जाते दानवानां पृथासुत।। २९

विषण्णमनसो देवाः समहेंद्रास्तदाभवन ।
जातमात्रस्तु दैत्येंद्रस्तारकश्चंडविक्रमः ।। ३०

अभिषिक्तोऽसुरो दैत्यैः कुरंगमहिषादिभिः ।
सर्वासुर महाराज्ये युतः सर्वैर्महासुरैः[१] ।। ३१

सतु प्राप्तमहाराज्यस्तारकः पांडुसत्तम ।[२]
उवाचदानवश्रेष्ठान्युक्तियुक्तिमिदं वचः ।। ३२

श्रृणुध्वमसुराः सर्वे वाक्यं मम महाबलाः ।
श्रुत्वा वः स्थेयसी बुद्धिः क्रियतां वचनेमम् ।। ३३

अस्माकं जातिधर्मेण विरुद्धं वैरमक्षयम् ।
[३]करिष्याम्यहं तद्वैरं तेषां च विजायाय च ।। ३४

तस्मादादौ करिष्यामि तपो घोरं दनोः सुताः ।। ३५

---

*अ इति श्री स्कंदपुराणे कुमारेश माहात्म्ये तारकस्य जन्म ।।
The sloka No.29 begins with the word -

"नारद उवाच" which is missing in the printing work

१ अ. गुणैः

२ अ. नंदन

३ अ. ब. "सुरैः" अत आरंभेति ।

ततः सुरान्विजेष्यामो भोक्ष्यामोऽथ जगत्त्रयम् ।
मुक्तोपायोऽहि पुरुषाः स्थिरश्रीरेव जायते ।। ३६

अयुक्तश्चपलः प्राप्तामपि रक्षितुमक्षमः ।
तच्छ्रुत्वा दानवाः सर्वे वाक्यं तस्यासुरस्य तु ।। ३७

साधुसाध्वित्यथोचुस्ते वचनं तस्य विस्मिताः[१] ।।
सोऽगच्छत्पारियात्रस्य गिरेः कंदरमुत्तमम् ।। ३८

सर्वर्तुकुसुमाकीर्णनानौषधिविदीपितम् ।
नानाधातुरसस्त्रावविचित्रनानागृहाश्रयम् ।। ३९

अनेकाकारबहुलं पृथकपक्षिकुलाकुलम् ।
नानाप्रस्त्रवणोपेतं नानाविधजलाशयम् ।। ४०

प्राप्य तत्कंदरं दैत्यश्चकार विपुलं तपः ।
वहन्याशुयतां दीक्षां पंच मंत्राञ्जजाप सः ।। ४१

निराहारः पंचतपा वर्षायुतमभूत्किल ।
ततः स्वदेहादुत्कृत्य कर्षकिर्ष दिने दिने ।। ४२

---

१ ब. ता

मांसस्याग्नौ जुहावैव ततो निमांसितां गतः ।
ततो निर्मांसदेहः स तपोराशिरजायत ।। ४३

जज्वलुः[१] सर्वभूतानि तेजसा तस्य सर्वतः ।
उद्विग्नाश्च सुराः सर्वे तपसा तस्य भीषिताः ।। ४४

एतस्मिन्नंतरे ब्रह्मा परमं तोषमागतः ।
तारकस्य वरं दातुं जगाम शिखरं गिरेः ।। ४५

प्राप्य तं शैलराजानं हंसस्यंदनमास्थितः ।
उवाच तारकं देवो गिरा मधुरया तदा ।। ४६

ब्रह्मोवाच ।।[२]
उतिष्ठ पुत्र तपसो नास्त्यसाध्यं तवाधुना ।
वरं वृणीष्वाभिमतं यते मनसि वर्तते ।। ४७

इत्युक्तस्तारको दैत्यः प्रांजलिः प्राह तं विभुमश्च ।। ४८

तारक उवाच ।।[३]
वयंप्रभो जातिधर्माः कृतवैराः सहामरैः ।
तैश्च निःशेषिता दैत्याः कृताः क्रूरैनृशंसवत् ।। ४९

---

१ अ ब. जज्व्हलु
२ ब. श्री ब्रह्मा
३ अ. प्रतौ नास्ति ।

तेषामहं समुद्धर्ता भवेयमिति मे मतिः ।
अवध्यः सर्वभूतानामस्त्राणां च महौजसाम् ।। ५०

स्यामहं वामरैश्रेष्ठा वरो मम त्वृदिस्थितः ।
एतन्मे देहि देवेश नान्यं वैरोच[1]मेवरम् ।। ५१

तमुवाच ततो दैत्यं विरंचोऽमरनायकः ।
न पुज्यते विना मृत्युं देहिनो देहधारणम् ।।
जातस्य हि ध्रुवो मृत्युः सत्यमेतच्छुतीरितम् ।। ५२

इति संचिंत्य वरय वरं[2] यस्मान्न शंकसे ।
ततः संचिंत्य दैत्येंद्रः शिशुतः सप्तवासरात्[3] ।। ५३

तारक उवाच ।।[4]
वासूराणां च[5] सप्तानां वर्जयित्वातु[6] बालकम् ।
देवानामप्यवध्योऽहं भूयासं तेन याचितः ।। ५४

वत्रे महासुरो मृत्युं ब्रह्मणं मानमोहितः ।
ब्रह्मा प्रोचे ततस्तं च तथेति हरवाक्यतः ।। ५५

जगाम त्रिदिवं च दैत्यं दैत्येश्वरास्तदा ।। ५६

---

१ अ. ..... ते वरं ।।
२ अ. प्रतौ "मृत्युं" इति स्यात्
३ ब. वासरान्
४ अ. ब. इत्ययं पाठः नास्ति ।
५ अ. ब. तु
६ अ. च

परिवब्रुः फलाकीर्णं वृक्षं शकुनयो यथा ।
तस्मिन्महति राज्यस्थे तारके दितिनंदने ।। ५७

ब्रह्मणाभिहितस्थाने महार्णवतटोत्तरे ।
तरवो जज्ञिरे पार्थ तत्र सर्वर्तवः शुभाः ।। ५८

कांतिर्द्युतिर्धृतिर्मेधा श्रीरखंडा च दानवम् ।
परिवव्रुर्गुणा कीर्णं निश्छिद्राः सर्व एव हि ।। ५९

कालागरुविलिप्तांगं महामुकुट[1]मंडितम् ।
रुचिरांगदसन्नद्धं महासिंहासने स्थितम् ।। ६०

नृत्यंत्यप्सरसः श्रेष्ठा गन्धर्वा गायंति च ।
चन्द्रार्कौ दीपमार्गेषु त्यजनेषु च मारुतः[2] ।।
ग्रहा अग्रेसरास्तस्य जीवादिशप्रभाषिणः ।। ६१

एवं स्वकाद्बाहुबलात्स दैत्यः संप्राप्यराज्यं परिमोदमानैः।
कदाचिदाभाष्य जगाद मंत्रिणः प्रोद्धृतसर्वागि बलेन दर्पितः ।।६२

* ३ इति श्रीस्कांदे महापुराण एकाशीति साहस्त्र्यां संहितायां
प्रथमे माहेश्वरखण्डे कौमारिका खण्डे कुमारेशमाहात्म्ये तारकासुरोत्पत्तिवर्णनं-
नाम् पंचदशोऽध्यायः ।।

---

१ अ. ब. .....ब्रृहिणां ।         २ अ. ब. मारुताः
* अ. इति श्री स्कंदपुराणे कुमारेश माहात्म्ये तारक वर प्राप्तिः ।
ब. इति श्री स्कंद पुराणे कुमारेश्वर माहात्म्ये पंचदशोऽध्यायः ।।१५।।